International Journal of Academic Research and Development
ISSN: 2455-4197, Impact Factor: RJIF 5.22
www.academicsjournal.com
Volume 2; Issue 4; July 2017; Page No. 800-802

# मनुयाज्ञवल्क्यस्मृत्युक्तदिशा व्यवहारः

**Biswajit Pal**

Research Scholar, Dept. of Sanskrit, Pali & Prakrit, Bhasha Bhavana, Visva-Bharati, Santiniketan, West Bengal, India

**Introduction**

वि - अव - हृ अ (घञ्) करणवाच्ये इत्यनेन व्यवहारशब्दो निष्पद्यते। याज्ञवल्क्यस्मृत्यामाचार्ययाज्ञवल्क्येन व्यवहारस्य लक्षणे उक्तम् -

स्मृत्याचारव्यपेतेन मार्गेणाधर्षित: परै:।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥ (या.स्मृ.2.5)

अर्थात् मन्वादिस्मृतिशास्त्रविरुद्धमार्गेण वैदिकाचारविरुद्धमार्गेण चापरै: पीडित: सन् तत्पीडाविषये कश्चिद्राज्ञे आवेदयति चेत्तद् व्यवहारपदवाच्यं भवति। मिताक्षराटीकायां विज्ञानेश्वराचार्येणोक्तम् - अन्यविरोधेन स्वात्मसंबन्धितया कथनं व्यवहार:, यथा कश्चिदिदं क्षेत्रादि मदीयमिति कथयति, अन्येऽपि तद्विरोधेन मदीयमिति (मिता. 1.1.)। क्रोधलोभपरित्यागी राजा स्वयं धर्मशास्त्रदृष्ट्या वेदव्याकरणधर्मशास्त्रज्ञैर्ब्राह्मणै: सह व्यवहारान् पर्यालोचयेत्। विचारसभायां वेदव्याकरणमीमांसादिविविधशास्त्रेषु निष्णाता धर्मशास्त्रज्ञा: सत्यवादिन: शत्रुमित्रे च समदर्शिनो जना राज्ञा सभासद्रूपेण नियोक्तव्या:। कार्यान्तरे व्यापृतो राजा स्वयं व्यवहारदर्शनेऽसमर्थो भवति चेद् धर्मशास्त्रेषु निपुणं सर्वधर्मज्ञं कञ्चिद् ब्राह्मणं प्राड्विवाकरूपेण नियुञ्ज्यात्। राज्ञोऽनुपस्थित्यां स प्राड्विवाक विचारकार्यं परिचालयेत्।

व्यवहारस्य चत्वार: पादा: क्रमा वा सन्ति। ते च पादा क्रमेण भाषापाद उत्तरपाद: क्रियापाद: साध्यसिद्धिपादश्चेति। भाषापादे अर्थीप्रत्यर्थिनो नामगोत्रज्यात्याद्युल्लेखपूर्वकमर्थीकृताभियोग: प्रत्यर्थिनोऽग्रतो लेखनीय:। उत्तरपादे अर्थिनो लेख्यपत्रसंशोधनादनन्तरमर्थीकृताभियोगखण्डनाय प्रत्यर्थीकृतमुत्तरपत्रमर्थिन: सम्मुखे लेखनीयम्। क्रियापादेऽर्थी स्वकृताभियोगपक्षे सर्वविधं प्रमाणं प्रदर्शयेत् लेखयेच्च। साध्यसिद्धिपादे लिखितभुक्तिसाक्ष्यादिप्रमाणैरर्थी प्रत्यर्थी वा विजयं लभते।

मनुस्मृतेरष्टमाध्याये विवादस्थानानामष्टादशत्वं तेषामाद्यमृणादानम् (म.स्मृ.8.4-7) इति चतुर्भि: श्लोकैरुल्लिखितं भवति। मनुस्मृत्युक्तान्येतान्यष्टादशविवादपदानि योगीवरयाज्ञवल्क्याचार्येण स्वीकृतानि भवन्ति। मनुस्मृत्युक्तविवादस्थानानां क्रम ईदृशो यद् ---

1. ऋणादानम् - Nonpayment of debts
2. निक्षेप: - Deposit
3. अस्वामिविक्रय: - Sale by one who is not the owner
4. सम्भूयसमुत्थानम् - Co-operative business
5. दत्तस्यानपकर्म - Resumption of gifts
6. वेतनादानम् - Nonpayment of wages
7. संविद्व्यतिक्रम: - Breach of compacts or conventions
8. क्रयविक्रयानुशय: - Rescission of purchase and sale
9. स्वामिपालविवाद: - Dispute between master and herdsman
10. सीमाविवाद: - Rules about boundary disputes
11. दण्डपारुष्यम् - Assault by weapons etc.
12. वाक्पारुष्यम् - Assault by harsh words
13. स्तेयम् - Theft
14. साहसम् - Violent offences
15. स्त्रीसंग्रहणम् - Adultery
16. स्त्रीपुंधर्म: - Duties of husband and wife
17. विभाग: - Partition
18. द्यूतमाह्वय: - Gambling and prize fighting

याज्ञवल्क्याचार्येण तु मनुस्मृत्युक्तैरष्टादशविवादस्थानै: सह अभ्युपेत्याशुश्रूषा (The breach of a contract of service) विक्रीयासंप्रदानं (Nondelivery of sold chattel) प्रकीर्णम् (Miscellaneous matters) इति त्रिणि विवादपदानि पृथगरुपेण संयोजितानि भवन्ति। मनुस्मृत्युक्तं स्त्रीपुंधर्मनामकं व्यवहारपदं याज्ञवल्क्याचार्येण व्यवहाराध्याये नोल्लिखितं पूर्वस्मिन्नेवाध्याये सम्यगालोचितत्वात्। ततो योगीवरेण याज्ञवल्क्याचार्येण विशंतिर्विवादपदानि स्वीकृतानि भवन्ति। याज्ञवल्क्यस्मृत्यां मनुस्मृत्युक्तव्यवहारपदानां क्रमो नानुसृतो भवति। अत्र याज्ञवल्क्यस्मृत्युक्तक्रमेण तेषां व्यवहारपदानां स्वरूपाण्यालोच्यते।

याज्ञवल्क्याचार्येण ऋणादानमिति व्यवहारपदमादौ समुपस्थापितम्। ऋणं कृत्वा तस्याप्रदाने उत्तमर्णेन तस्यादायस्योपायोऽधमर्णस्य च प्राप्यदण्डविषयकमालोचनमत्र विधीयते। सबन्धकाबन्धकभेदेन ऋणं द्विविधम्। सबन्धके ऋणेऽधमर्ण: प्रतिमासमशीतितमो भाग उत्तमर्णाय प्रयच्छेत्। अबन्धके ऋणे तु ब्राह्मणादिवर्णक्रमेण प्रतिमासं द्वित्रिचतुष्पञ्चकञ्च शतमधमर्ण: प्रयच्छेत्। ऋणादानविषयेऽभियुक्तं यथाकालमुत्तमर्णं निकषा समुपस्थापनाय दर्शनप्रतिभू: कस्मिंश्चिद् विषये विश्वासोत्पादनाय प्रत्ययप्रतिभूरधमर्णस्यासामर्थ्ये स्वयमेव ऋणपरिशोधं करोमीत्यर्थे च दानप्रतिभू: स्वीक्रियते इति।

किञ्चिदपि द्रव्यं वासनस्थं कृत्वा तस्य रूपसंख्यादिविषयमविज्ञाप्य कमपि निकषा आधीयते चेत् तद्द्रव्यमुपनिधिरित्यभिधीयते। साक्षीसहित: साक्षीरहितश्चेत्युपनिधिर्द्विविध:। साक्षीसहितोपनिधि: साक्षिण: पुरत एव प्रत्यर्पणीय:।

पूर्वधनस्वामिमरणादनन्तरं तत्सम्बन्धिन्यपरजने तस्य धनस्य यत् स्वत्वमुत्पद्यते तदेव दायशब्देनाभिधीयते। सप्रतिबन्धाप्रतिबन्धभेदेन दायो द्विविध:। पुत्र: पौत्रश्च पितृधनं पितामहादागतधनञ्चावाधेन प्राप्नोतीत्यप्रतिबन्धो दाय:। अपुत्रकस्य पितृव्यस्य भ्रात्रादेश्च मरणादनन्तरं भ्रातुष्पुत्रो भ्रात्रादिश्च तद्धनं प्राप्नोतीति सप्रतिबन्धो दाय: सप्रतिबन्धदाये साक्षाद्भावेन दायग्रहणमसम्भवम्।

सीमाशब्देन क्षेत्रादेर्मर्यादा ज्ञापकचिह्नं वा प्रतीयते। तद्विषयको विवाद: सीमाविवाद:। सीमाविषयको विवादो द्विविधोपायेन सञ्जायते। यथा ग्रामयोर्मध्ये विवादो ग्रामान्तर्वर्तीक्षेत्रयोर्मध्ये विवादश्चेति। सीमाया चत्वार: प्रकारा विद्यन्ते। ते च प्रकारा जनपदसीमा ग्रामसीमा क्षेत्रसीमा गृहसीमा चेति। ज्ञापकचिह्नभेदेन सीमा पञ्चविधा। ता यथा ध्वजिनी मत्स्यिनी नैधानी भयवर्जिता राजशासननीता चेति। ध्वजिनी वृक्षादिलक्षिता मत्स्यिनी सलिलवती नैधानी निखाततुषाङ्गारादिमती भयवर्जिता अर्थीप्रत्यर्थीपरस्परसंप्रतिपत्तिनिर्मिता

राजशासननीता ज्ञातृचिह्नाभावे राजेच्छया निर्मिता चेति। सीमाविषयको विवाद: षड्भि: प्रकारै: संभवति। ते यथा अंशे आधिक्यं न्यूनता अंशे अस्तित्वं नास्तित्वञ्चाभोगभुक्ति: सीमा चेति।

क्षेत्रस्वामीपशुपालकयोर्विवाद: स्वामिपालविवाद इत्युच्यते। पशुपालकस्यानवधानतायां काचित् महिषी गौरजाविका वा परक्षेत्रजातं शस्यं विनश्यति चेत् तत्पालक: क्रमेणाष्टौ माषान् चतुरो माषान् द्वौ माषौ च दण्डनीय:। ताम्रिकपणस्य विंशतितमो भागो माषशब्देन सूच्यते। अपरस्य निक्षिप्तं नष्टमपहृतं वा द्रव्यं रहसि विक्रीयते चेत्तदस्वामिविक्रय नाम व्यवहारपदवाच्यं भवति। द्रव्यस्वामी स्वस्य द्रव्यमन्यविक्रीतं पश्यति चेत्स द्रव्यस्वामी तद्द्रव्यं गृह्णीयात्। क्रेता अस्वामिन: सकाशात् रहसि किञ्चिद्द्रव्यं रात्रादौ क्रीणाति चेत् स चौरवद् दण्डार्हो भवेदिति।

कञ्चिद्द्रव्यं कस्मै प्रदाय पुनस्तदाददाति चेत्तदेव दत्ताप्रदानिकमित्याख्यायते। विहिताविहितपथमवलम्ब्य दत्ताप्रदानिकं दत्तानपकर्म चेति दानाख्यं व्यवहारपदं द्विविधम्। न्यायमार्गं तथा धर्ममार्गमवलम्ब्य कञ्चिद्द्रव्यं दत्त्वा पुनस्तदादातुमिच्छति यस्मिन् विवादपदे तदेव दत्तानपकर्म इत्युच्यते। अन्यायमधर्ममार्गञ्चावलम्ब्य किञ्चिद्द्व्यं दत्त्वा पुनस्तदादातुमिच्छति चेत् तदेव दत्ताप्रदानिकं नाम व्यवहारपदमिति ज्ञायते।

मूल्येन कञ्चिद्द्रव्यं क्रयणादनन्तरं क्रेतु: सन्तुष्टिर्न जायते चेत् क्रयविषये क्रेतुरनुशयो क्रीतानुशय इत्युच्यते। क्रीतानुशये क्रीतद्रव्यं यथाकालमविकृतावस्थायां प्रत्यर्पणीयम्।

शुश्रूषा करिष्यामीत्यङ्गीकृत्य तदनन्तरं यो न संपादयति तद्विवादपदमभ्युपेत्याशुश्रूषा इति नामाख्यायते। शिष्योऽन्तेवासी भृतकोऽधिकर्मकृद् दासेति शुश्रूषाकारी पञ्चविध:।

नास्तिकास्तिकादिमतावलम्बिन: स्वस्वनियमं समय इत्याहु:। तस्य समयस्योल्लङ्घणं व्यतिक्रमो वा संविद्व्यतिक्रम इत्यभिधीयते। यो जन: स्वनियमं स्वधर्मं वा व्यतिक्रामति राजा तस्य सर्वस्वमपहृत्य स्वराष्ट्रात्तं निष्क्रामयेत्।

वेतनग्रहणादनन्तरं केनचित् स्वाङ्गीकृतं कार्यं न क्रियते चेत् तद्विवादपदं वेतनादानमित्याख्यायते। कश्चिद् वेतनं गृहीत्वा स्वाङ्गीकृतं कर्म त्यक्त्वा गच्छति चेत्स तद्वेतनस्य द्विगुणार्थं दण्डरूपेण स्वामिने दद्यात्। वेतनं त्यक्तवा तु गच्छति चेत्स वेतनतुल्यं मूल्यं स्वामिने प्रदद्यात्।

अक्षैर्चर्मनिर्मितपट्टिकाभि: शलाकादिभिश्च या पणक्रीडा अनुष्ठीयते सा द्युतक्रीडा इत्युच्यते। मल्लमेषमहिषादिप्राणिभिर्या पणक्रीडा अनुष्ठीयते सा समाह्वय इति पदवाच्या भवति। अर्थात् पणस्य हेतोर्द्यूतक्रीडा पक्षीमेषादीनां युद्धसंघटनञ्चेति द्यूतसमाह्वय इत्युच्यते।

पारुष्यमिति पदस्यार्थो वेदनाप्रदायको व्यवहार:। पारुष्यमिदं द्विविधं वाक्पारुष्यं दण्डपारुष्यञ्चेति। देशजातिकुलादीनुल्लिख्य आक्रोशनिन्दावमाननासूचकं यद्वाक्यं मनस्युद्वेगं जनयति तदेव वाक्पारुष्यमित्युच्यते। गौडा: कलहप्रिया इति वाक्येन गौडदेशस्य निन्दा सूच्यते। नितान्तो लोलुपा विप्रा इत्यनेन ब्राह्मणजातेर्निन्दा सूच्यते। कुटिला खलु विश्वमित्रा इति वाक्यप्रयोगेण च विश्वमित्रवंशस्य निन्दा सूच्यते। वाक्पारुष्यं त्रिविधं निष्ठुरमश्लीलं तीव्रञ्चेति। धिङ्मूर्खो जाल्म इत्यादिवाक्योच्चारणं निष्ठुरवाक्पारुष्यम्। अहं त्वदीयां भगिनीं मातरं पत्नीं वाभिगन्तास्मि इत्येवं वाक्योच्चारणमेवाश्लीलवाक्पारुष्यम्। त्वं सुरापानकारी ब्रह्महत्याकारीत्यादिवाक्योच्चारणं तावत् तीव्रवाक्पारुष्यमिति।

हस्तपदाद्यस्त्रादिभ्युपघातेन धूलिभस्मपुरीषादिस्पर्शनेन वा मनसि दु:खोत्पादनमेव दण्डपारुष्यमित्यभिधीयते। येन दण्ड्यते इति दण्डस्तेन दण्डेन यत्पारुष्यं विरुद्धाचरणं तद् दण्डपारुष्यमिति। आघातार्थं दण्डाद्युत्तोलनरूपमवगोरणं दण्डाद्याघातसम्पादनरूपं नि:सङ्गतनमाघातेन क्षतादिदर्शनरूपं क्षतजदर्शनञ्चेति साधनभेदेन दण्डपारुष्यं त्रिविधम्। मृदुमध्यमोत्तमसाहसभेदेन दण्डपारुष्यं पुनस्त्रिविधम्।

साहसमिति पदेन बलमेव सूच्यते। सहसा बलेन कृतमिति साहसम्। जनगणस्य द्रव्यमपरस्य द्रव्यं वा बलपूर्वकं हरणमेव साहसमित्युच्यते। राजपुरुषसकाशाद् जनगणस्य च सकाशात् प्रकाश्ये एव दिवालोके यत्किञ्चित् मारणं हरणं बलेन संघट्यते तानि सर्वाण्येव साहसपदवाच्यानि। चौर्ये वाक्पारुष्ये दण्डपारुष्ये स्त्रीसंग्रहे च साहसं विद्यते। अपराधस्य गुरुत्वविचारेण प्रथममध्यमोत्तमभेदेन साहसं त्रिविधम्। उद्यानस्य फलं मूलं जलादि च लाङ्गलादिना नष्टं विकृतं वा क्रियते चेत् तदेव प्रथमसाहसमिति स्मृतम्। वस्त्रपश्वन्नपानीयानां गृहोपकरणस्य च क्षतिसाधनं मध्यमसाहसमित्यभिधीयते। विषप्रयोगेण शस्त्रादिना वा प्राणहरणं परदाराभिमर्शनं प्राणान्तकरं यत्किमपि कार्यं तदुत्तमसाहसमिति मन्यते। प्रथमसाहसस्य दण्डो पणशतादधिको न भवति। मध्यमसाहसस्य दण्डस्तावत् पणपञ्चशतादधिको न भवति। उत्तमसाहसस्य दण्डो न कदापि पणसहस्रादधिको भवतीति। अपराधस्य गुरुत्वविचारेण क्षेत्रविशेषे मुखमण्डले चिह्नाङ्कणमङ्गदनं वध: सर्वस्वलुण्ठनं नगरान्निर्वासनं चोत्तमसाहसस्य दण्डरूपेण शास्त्रकारैर्निरूपितम्।

कश्चिद्विक्रेता क्रेतु: पण्यविक्रयार्थं मूल्यग्रहणादनन्तरं तत्पण्यं क्रेत्रे न प्रददाति चेत् तदा यद्विवाद: सूच्यते तदेव विवादपदं विक्रीयासम्प्रदानमित्यभिधीयते। विक्रेता पण्यमूल्यमादाय क्रेत्रे पण्यं न प्रयच्छति चेत्तर्हि राजा सर्वृद्धिकं पण्यद्रव्यं क्रेत्रे प्रदापयेत्।

सम्भूय इति पदस्यार्थो बहुजनैर्मिलितभाव इति। समुत्थानमिति पदस्यार्थोऽर्थलाभार्थं वाणिज्यादिकर्मसम्पादनमिति। समवायेन वाणिज्यादिकर्मसम्पादने यो यत्परिमाणस्यार्थस्य विनियोग: करोति लाभालाभस्य तत्परिमाणमंशमेव स गृह्ण्यात् प्रदद्याद्वा।

रहसि द्रव्यस्वामिनो द्रव्यहरणमेव स्तेयमिति। सर्वसमक्षे चौर्यं कृत्वा भयादस्वीकरोति चेत् तदपि स्तेयमित्यभिधीयते। निद्रितानवहितमद्यपानोन्मत्तजनेभ्य: किञ्चिद्द्रव्यं विविधछलेनापह्रीयते चेत् तदेव स्तेयमित्युच्यते। अपहरणस्याभियोगेनापहृतद्रव्यस्यांशं दृष्ट्वा तस्करस्य पदचिह्नं वानुसृत्य राजपुरुषैश्चौरो ग्रहीतव्य:।

परदारसम्भोगार्थं कश्चित् स्त्रियं संगृह्णाति चेत् तदेव विवादपदं स्त्रीसंग्रहणमित्युच्यते। परस्त्रीसंग्रहणे प्रवृत्तो जनो दण्डार्हो भवति। परन्तु तत्र संग्रहणज्ञानमावश्यकम्। परदारस्य कटिवस्त्रं गलवस्त्रं स्तनोरुकेशञ्च स्पृशति चेत् निर्जने जनाकीर्णे अन्धकारकुले स्थाने असमये परभार्यया सह संलापनं करोति चेत् परभार्यया सहैकस्मिन्नेवासने उपविशति चेत् स परस्त्रीसंग्रहणे प्रवृत्त इति ज्ञायते। सजातीयेऽरक्षिते परस्त्रीगमने उत्तमसाहसदण्डो विधेय:। आनुलोम्ये हीनवर्णे वारक्षिते परस्त्र्यभिगमने मध्यमसाहसदण्ड: कार्य:। प्रातिलोम्ये उच्चवर्णेऽरक्षिते तु परदाराभिगमने वधदण्डो विधेय:।

स्मृत्याचारव्यपेतमार्गेण विविधविषये राजाज्ञोल्लङ्घनं क्रियते चेद्राजा तस्मिन् तस्मिन्नेव विषये यद् व्यवहारनिर्णयं करोति तदेव प्रकीर्णकमिति व्यवहारपदवाच्यं भवति। तद्यथा राजप्रदत्तभूमेन्यूनत्वमाधिक्यं वा प्रकाशयन् राजशासनं योऽभिलिखति यश्च परदारसंग्रहणकारिणं चौरं वा गोपनेन मुञ्चति तावुभावुत्तमसाहसौ दण्डनीयौ। मुत्रपुरीषादिमिश्रमन्नपानादिकं भक्षयित्वा ब्राह्मणक्षत्रियवैश्यशूद्रञ्च दूषयति चेत् स दूषणकर्ता क्रमेणोत्तममध्यमप्रथमार्धसाहसान् दण्डान् प्राप्नुयादिति बहुविधानां विवादानां दण्डश्चात्र विधीयते।

वर्तमाने समाजेऽपि मनुयाज्ञवल्क्यस्मृत्युक्तविवादपदानामेतेषां प्रयोग: सन्दृश्यते। वर्तमाने भारतीयविचारव्यवस्थाया बहुषु स्थलेषु मनुयाज्ञवल्क्यस्मृत्युक्तव्यवहारविधानानां प्रयोगोऽविकृतेन भवति। कुत्रचिद्वा समाजपरिवर्तनेन सह सुष्ठुरूपेण शासनं प्रवर्तनाय शास्त्रोक्तव्यवहारविधानानां किञ्चित् परिमार्जनं क्रियते। तथापि वर्तमानसमाजे मनुयाज्ञवल्क्यस्मृत्युक्तव्यवहारविधानानां महद्गुरुत्वं वर्त्तते इत्यत्र नास्ति कोऽपि संशय:॥

**सहायकग्रन्थसूची**


1. कौटिलीयम् अर्थशास्त्रम् - ड:मानवेन्दुवन्द्योपाध्याय:, संस्कृतपुस्तकभाण्डारम्, कोलकाता, 2002।
2. धर्मशास्त्रस्येतिहास: - प्रो. जयकृष्णमिश्र :, चौ.स.स.अ.वाराणसी, 2010।
3. नारदस्मृति: - चौखम्बा संस्कृतभवनम्, वाराणसी, 1996।
4. भारतीयसाक्ष्य आइन - लभ्यान, कलिकाता, 1999।
5. मनुस्मृति: - आचार्यजगदीशलालशास्त्री, मोतीलालबनारसीदास:, दिल्ली, 2010 ।
6. मनुसंहिता - ड: मानवेन्दुवन्द्योपाध्याय:, संस्कृतपुस्तक- भाण्डारम् , कोलकाता, 1410 वंगाब्द:।
7. याज्ञवल्क्यस्मृति: - नारायणरामाचार्य, राष्ट्रीयसंस्कृत -संस्थानम्, नईदिल्ली, 2010।
8. याज्ञवल्क्यसंहिता (व्यवहाराध्याय:) - ड: अनिलचन्द्रवसु - श्रीमतीनूपुरघोषश्च, संस्कृतवुक्डिपो, कोलकाता, 2009।
9. याज्ञवल्क्यसंहिता (व्यवहाराध्याय:) - श्रीयदुपति-त्रिपाठी, वि.एन्. पाब्लिकेशन् एण्ड हेमन्तवुक एजेन्सि, कोलकाता, 1407 वंगाब्द:
10. याज्ञवल्क्यसंहिता (व्यवहाराध्याय:) - श्रीमती सुमितावसुन्यायतीर्थ:, संस्कृतपुस्तकभाण्डारम्, कलिकाता, 1407 वंगाब्द:।
11. वैदिकसाहित्यं (वेदमीमांसा) - अनिर्वाण, संस्कृत बुक डिपो, 2006
12. व्यवहारमयूख: - नीलकण्ठ:, राष्ट्रीयसंस्कृतसंस्थानम्, नई दिल्ली, 2009।
13. स्मृतिसन्दर्भ: - नागप्रकाशक, दिल्ली, 1988।
14. संस्कृतसाहित्येररूपरेखा - ड: विमानचन्द्र भट्टाचार्य:, वुक् ओयार्ल्ड, 2004।
15. हिष्ट्रि अव् धर्मशास्त्र - ड: पाण्डुरङ्गवामनकाने, भाण्डारकर-ओरियेण्टाल रिसर्च इन्ष्टीट्युट्, पुना, 1962।